Narayana Suktam

नारायणसूक्तम्

NityaPaath
nityapaath.com/narayana-suktam/

MANTRA · मन्त्राः

1 सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम्।
विश्वं नारायणं देवमक्षरं परमं प्रभु(पद)म्॥

2 विश्वतः परमं नित्यं विश्वं नारायणꣳ हरिम्।
विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति॥

3 पतिं विश्वस्यात्मेश्वरꣳ शाश्वतꣳ शिवमच्युतम्।
नारायणं महाज्ञेयं विश्वात्मानं परायणम्॥

4 नारायणः परं ब्रह्म तत्त्वं नारायणः परः।
नारायणः परो ज्योतिरात्मा नारायणः परः॥
[नारायणः परो ध्याता ध्यानं नारायणः परः।]

5 यच्च किञ्चिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः॥

6 अनन्तमव्ययं कविꣳ समुद्रेऽन्तं विश्वशम्भुवम्।
पद्मकोशप्रतीकाशꣳ हृदयं चाप्यधोमुखम्॥

7 अधो निष्ट्या वितस्त्यान्ते नाभ्यामुपरि तिष्ठति।
हृदयं तद्विजानीयाद्विश्वस्यायतनं महत्॥

8 सन्ततꣳ सिराभिस्तु लम्बत्याकोशसन्निभम्।
तस्यान्ते सुषिरꣳ सूक्ष्मं तस्मिन्त्सर्वं प्रतिष्ठितम्॥

9 तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः।
सोऽग्रभुग्विभजन्तिष्ठन्नाहारमजरः कविः॥
[तिर्यगूर्ध्वमधःशायी रश्मयस्तस्य
सन्तता(ः)।]

10 सन्तापयति स्वं देहमापादतलमस्तकम्।
तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थिता॥

11 नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा।
नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा॥

12 तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः।
स ब्रह्मा स शिवः [स हरिः] सेन्द्रः सोऽक्षरः
परमः स्वराट्॥

Text checked against: Swami Vimalananda (ed., tr.), Mahanarayanopanisad, Sanskrit text with Sayana-based commentary and English translation, Sri Ramakrishna Math, Madras, 1986. Meanings, audio and all scripts at nityapaath.com/narayana-suktam/